प्रतिग्रह एवेति वाच्यम् । यतः प्रसिद्धप्रत्यवस्कन्दनेऽपि ग्रहणाद्यभ्युपगमेन प्रतिदानादिकारणोत्तरतैवास्यासम्भाविनीति वाच्यम् एकदेशाभ्युपगमस्य प्रायिकत्वात् । कारणोपन्यासस्यैवोत्तरान्तरासङ्कीर्णतया तल्लक्षणत्वावश्यम्भावात् । एवं च कृत्स्नपक्षव्यापि सप्राङ्न्यायं मिथ्योत्तरमपि द्रष्टव्यम् । यथा प्राकृतनाभियोग एव । यद्येवं प्रतिवदति मिथ्यैतत् । यतः प्रागप्यस्मिन्नभियोगे मया व्यवहारमार्गेण पराजित इति । अत्रापि प्राङ्न्यायकारणोक्तौ" इत्यादिप्राक्प्रदर्शितवचनात् प्रत्यर्थिन एव क्रियोपन्यासः । प्राङ्न्यायसिद्धौ प्रतिज्ञायाः प्रकटमेव मिथ्यात्वपर्य्यवसानादस्य शुद्धप्राङ्न्यायविषयत्वासम्भवादेतादृशप्राङ्न्यायविषयताया अप्यवर्जनीयत्वात् । पक्षप्रतिक्षेपक्षमस्यास्य प्राग्वदेवानुत्तरत्वानर्हत्वात् । यत्र तु कारणप्राङ्न्याययोः कृत्स्नपक्षव्यापितयैकोत्तरत्वं तत्र प्रत्यर्थिना प्राङ्न्याय एव साधनीयः । कारणसाधनस्य तदन्तर्भूतत्वात् । यथा रूपकशतमनेन मामकं गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्रतिदत्तत्वादिदानीमस्मै न धारयामि । अस्मिन्नेवार्थे प्रागमुनाहमभियुक्तस्तत्प्राड्व्यवहाररीत्यामुम्पराजितवानिति । इदानीं हीनपरिज्ञानोपायः तत्र मनुः । "बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् । स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च" । स्वरो विकृतो गद्गदत्वादिः । वर्णोऽप्यस्वाभाविकः कृष्णत्वादिः । इङ्गितं स्वेदवेपथुरोमाञ्चादि । आकारो विकृतो भ्रुवः क्रियादिः । चक्षुः कातरम् । चेष्टितं वृथास्थानात् स्थानान्तरगमनादि । याज्ञवल्क्यः "देशाद्देशान्तरं याति सृक्किणी परिलेढि च । ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च । परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते । वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि । स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः । अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्त्तितः ।" मनोवाक्कायकर्मभिर्यः स्वभावाद्विकृतिं गच्छेत् न भयादिनिमित्तमसावभियोगे साक्ष्ये वा दुष्टः परिकीर्त्तितः । मन आदि विकृतेरेव विविच्य दर्शयति । देशान्तरं याति नचैकत्रावतिष्ठते । सृक्किणी ओष्ठप्रान्तौ परिलेढि जिह्वया पुनः पुनः परिघट्टयतीति । कर्म्मणो विकृतिः । अस्य ललाटं स्विद्यते स्वेदबिन्दुवृन्दाङ्कितम्भवति । मुखं वैवर्ण्यं वर्णान्यत्वं पाण्डुत्वकृष्णत्वादि एति प्राप्नोतीति कायस्य । परिशुष्यत्स्खलद्वाक्यः परिशुष्यद्गद्गदं स्खलद्व्यस्तपदवर्णं वाक्यं यस्य सः । बहु अनुपयुक्तं विरुद्धं पूर्व्वापरविरोधवद्भाषते । परोक्तां वाचम्प्रतिवचनदानेन, इति वाचः । चक्षुश्च परस्य प्रतिवीक्षणेन न पूजयति नाभिनन्दतीति चक्षुषः । मनोविकृतेर्लिङ्गम्परकीयमनोविकृतेरप्रत्यक्षत्वात् । तथा ओष्ठौ निर्भुजति वक्रयत्युपर्य्यधोभावेन चालयतीति कायस्यैव विकृतिः । मनुरेव "आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च । नेत्रवक्त्रविकारैश्च ज्ञायतेऽन्तर्गतं मनः" कात्यायनः "आकारेङ्गितचेष्टाभिस्तस्य भावं विभावयेत् । प्रतिवादी भवेद्धीनः सोऽनुमानेन लक्ष्यते । कम्पः स्वेदोऽथ वैवर्ण्यमोष्ठशोषाभिमर्षणम् । भूलेखनं स्थानहानिस्तिर्य्यगूर्द्ध्वनिरीक्षणम् । स्वरभेदश्च दुष्टस्य चिह्नमाहुर्मनीषिणः" । प्रतिवादिशब्देन परस्परप्रतिपक्षवादित्वादुभयोर्ग्रहणम् । अभिमर्षणञ्जिह्वयोष्ठप्रान्तावलेहनं द्वन्द्वैकवद्भावः । श्रीरामायणे 'आकारं छाद्यमानोऽपि न शक्यो विनिगूहितुम् । बलाद्धि विवृणोत्येष भावमन्तर्गतं नृणाम्" । अनेन च पराजयसम्भावनामात्रम्प्रतिपाद्यते तस्य च फलं क्रियादिपरामर्शे सभ्यादीनामत्यवधानेन व्यवहारशेषविचारः । नत्वेतावता पराजयनिश्चयो साक्ष्यनिर्णयो वा, नैसर्गिकनैमित्तिकविकारयोर्वैलक्षण्यस्य विवेक्तुमशक्यत्वात् । यद्यपि कोऽपि निपुणतममतिर्विवेक्तुं शक्नुयात् तथापि न पराजयनिमित्तमसाक्षित्वनिबन्धनं वा दण्डादिकार्य्यं सम्भवति । न हि निपुणभिषगभियोगमूलकमरणनिश्चयेऽपि मृतकार्य्यमार्य्याः समाचरन्ति । योगीश्वरः "सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत् । नचाहूतो वदेत्किञ्चिद्धीनो दण्ड्यश्च स स्मृतः" । सन्दिग्धमधमर्णादिभिरनभ्युपगतमेवार्थं यः स्वतन्त्रः प्रमाणनिरपेक्ष एव साधयेदासेधादिना राजादिभ्योऽनिवेद्यैव तस्माज्जिघृक्षति तदुपरि दण्डाद्यापादयति वा स हीनो दण्ड्यो भवति । न परं प्रकृतार्थहानिमाप्नोति प्रत्युत स्वातन्त्र्यनिबन्धनं राजदण्डमपि दातुमर्हति । यश्च स्वयमभ्युपेतं साधनं वा साधितं याच्यमानो निष्पतेत् पलायेत । सोऽपि तथा दण्ड्यः साधितं धनञ्च दाप्यः । यश्चाहूतोऽभियुक्तो राज्ञा चाहूतः सदसि न किञ्चिद्वदति स प्रकृतार्थहानिं दण्डञ्च प्राप्नोति । प्रकरणात् दुष्टपरिज्ञानमेव मा भूदिति दण्डग्रहणं दण्ड्योऽपि शास्त्रोऽप्यर्थान्न हीयत इति स्वार्थान्न हीयत इत्यर्थादहीनत्वदर्शनादत्र तन्माभूदिति हीनग्रहणम् नारदोऽपि । "अन्यवादी